संस्कृतवार्ता:

दिनाङ्क :-25.09.2025

प्रात: - 06:55

<u>प्रधानमन्त्री-यात्रा</u>

प्रधानमन्त्री श्रीनरेन्द्रमोदी अद्य उत्तरप्रदेशस्य राजस्थानस्य च यात्रां करिष्यति। सः ग्रेटर्-नोएडा-नगरे पञ्चविंशत्यधिक द्विसहस्रतमवर्षस्य उत्तरप्रदेश-अन्ताराष्ट्रिय-व्यापार-प्रदर्शन्याः उद्घाटनं करिष्यति तथा च अस्मिन् अवसरे एकां सभां सम्बोधयिष्यति। अस्यां प्रदर्शन्यां हस्तशिल्पं, वस्त्रम्, चर्मम्, कृषिः, खाद्य-प्रसंस्करणम्,आयुष् इत्यादीनां प्रमुख क्षेत्राणां प्रतिनिधित्वं भविष्यन्ति। अस्मिन् उत्तरप्रदेशस्य समृद्धा कला, संस्कृतिः, पाकपद्धतिः च एकत्रैव प्रदर्शयिष्यन्ते। अस्य मासस्य ऊनविंशति दिनाङ्कपर्यन्तं व्यापारप्रदर्शन्याः आयोजनं भविष्यति। तदनन्तरं, प्रधानमन्त्री राजस्थानं गत्वा शताधिकद्वाविंशतिसहस्रोत्तरैकलक्षकोटिरूप्यकाणां बहुविधविकासपरियोजनानां शिलान्यासं उद्घाटनं च करिष्यति। सः बान्सवाडा-नगरे सार्वजनिकसभाम् अपि सम्बोधयिष्यति। श्रीमोदी पी. एम्. कुसुमेत्यस्य लाभार्थिभिः सहापि संवादं करिष्यति। प्रधानमन्त्री प्रायः द्विचत्वारिंशत् सहस्रकोटि-रूप्यकाणां अणुशक्ति-विद्युत-निगम-लिमिटेड् इत्यस्य माही-बांसवाड़ा-राजस्थान-परमाणु-विद्युदुत्पादन-परियोजनायाः शिलान्यासं करिष्यति। प्रधानमन्त्री राजस्थान-राज्ये प्रायः दशोत्तर द्विशताधिक ऊनविंशतिसहस्र कोटिरूप्यकाणां हरितोर्जा-परियोजनानां उद्घाटनम्, शिलान्यासं च करिष्यति। सः फलोदी, जैसलमेर्, जालोर्, सीकर् इत्यादिषु क्षेत्रेषु सौर-परियोजनानां उद्घाटनं करिष्यति।

<u>प्रधानमन्त्री-विश्व-खाद्य-भारतः</u>

प्रधानमन्त्री नरेन्द्रमोदी अद्य सायङ्काले नवदिल्ल्याः भारतमण्डपे पञ्चविंशत्यधिक द्विसहस्रतम वर्षस्य विश्व-खाद्य-भारत-इत्यस्य उद्घाटनम् करिष्यति।

चतुर्षु दिनेषु आयोजिते कार्यक्रमे खाद्यप्रसंस्करणक्षेत्रे, खाद्यस्थिरताक्षेत्रे, पोषणयुक्तस्य जैविकस्य च आहारस्य उत्पादने भारतस्य शक्तयः प्रदर्शयिष्यन्ते। एतत् खाद्यप्रसंस्करणे भारतस्य परिवर्तनशीलयात्रां प्रदर्शयति, सहैव अन्ताराष्ट्रियसहयोगस्य निवेशस्य च अवसरान् प्रवर्धयिष्यति पोषणं कुर्वन् । अस्मिन् महा-वैश्विक-खाद्य-कार्यक्रमे एक विंशतितोप्यधिकाः देशाः, एकविंशति राज्याः केन्द्रशासितप्रदेशाः, दश केन्द्रीयमन्त्रालयाः च भागं ग्रहीष्यन्ति।

## सीसीईए-मन्त्रिमण्डलम्

केन्द्रीय-मन्त्रिमण्डलेन ह्य: पञ्चनवति-सहस्रकोटिरुप्यकाणां षड्प्रस्तावेभ्यः अनुमतिः प्रदत्ता। केन्द्रीय-मन्त्रिमण्डलेन ह्य: भारतस्य जलपोत-निर्माणं सामुद्रिक-पारिस्थितिकीतन्त्रञ्च पुनर्जीवयितुं पञ्चविंशत्युत्तर-सप्तशताधिक-एकोनसप्तति-कोटिरुप्यकाणां आर्थिक-सम्पुटः अनुमोदितः। नवदिल्ल्यां सञ्चारमाध्यमिकान् विज्ञापयन् केन्द्रीयसूचना-प्रसारणमन्त्री अश्विनिवैष्णवः प्रोक्तवान् यत् अद्यतनीये मन्त्रिमण्डलीयोपवेशने स्वीकृताः निर्णयाः विविध-क्षेत्राणि व्याप्नुवन्ति।

श्रीवैष्णवेन प्रोक्तं यत् भारतस्य समुद्रिक-पारिस्थितिकीतन्त्रं पुनर्जीवयितुं अयं सम्पुटः चतुस्स्तम्भात्मकं दृष्टिकोणं प्रकाशयति। तेषु स्वदेशीयक्षमतायाः दृढीकरणम्, दीर्घकालिकवित्तपोषणे परिष्कारः, ग्रीनफ़ील्ड-ब्राउनफ़ील्डक्षेत्रयोः विकासः इत्येते विषयाः अन्तर्भवन्ति। सर्वकारेण दश-दशमलव-एकनवति-लक्ष-रेलकर्मचारिभ्यः पञ्चषष्ट्यधिक-अष्टशतोत्तर- कोट्यधिक-रूप्यतोऽप्यधिकं अष्टसप्तति-दिवसाधारितं उत्पादकता-सहवेतनमपि अनुमोदितम्। मन्त्रिमण्डलेन देशे स्नातक-चिकित्सा शिक्षाक्षमतायाः विस्ताराय अपि सहमतिः प्रकटिता।

## छत्तीसगढ-माओवादी

छत्तीसगढ-राज्ये, ह्यः दन्तेवाडा-जनपदे, एकविंशति-महिलाः समेत्य एकसप्तति माओवादिनः सुरक्षाबालानां समक्षम् आत्मसमर्पणं कृतवन्तः। आरक्षिबलानुसारी तेषु त्रिंशत् जनेषु चतुःषष्ठी लक्षरूप्यकाणां संयुक्तपुरस्कारः आसीत् इति।

क्रिकेट

पुरुषाणां विंशति-प्रति-विंशतिः एशिया-चषक-प्रतिस्पर्धायां दुबई अन्ताराष्ट्रीय -क्रिकेट-क्रीडाङ्गणे ह्य: भारतीय-दलं बांग्लादेश-दलम् एक चत्वारिंशत् धावनांकै: पराजित्य निर्णायक द्वन्द्वे प्रविष्टम्।